126/8

ग्रंथ

सिध्दान्त चन्द्रिका

Siddanth chandrika

व्याकरण

126
8

अथ
सिद्धान्तचन्द्रिका

126
8

संहितैकपदेनित्यानित्याधातूपसर्गयोः॥नित्यासमासेवाक्येतुसाविवक्षामपेक्षते॥तिङ्सुबन्तचयोवाक्यंक्रियावाकारकान्विता॥७॥
संधानंपूर्वपरयोरव्यवधानेनोच्चारणंसंधिः॥ समानाजातिः सजातिः संज्ञातौजावाः सजातीयाः॥ नहिपदार्थज्ञानेविनावाक्यार्थ
ज्ञानंस्यकारणतास्ति॥८॥

सि·च·नी· ॥श्रीगणेशायनमः॥ नमस्कृत्यमहेशानंमतङ्गमुद्गलपतञ्जलैः वाणीप्रणी
१
तसूत्राणांकुर्वेसिद्धान्तचन्द्रिकाम्॥ अइउऋऌसमानाः॥ अनेन
क्रमेणैतेवर्णाज्ञेयास्तेचसमानसंज्ञाःस्युः॥ नैतेषुसूत्रेषुसंधिरनुसंधे
योऽविवक्षितत्वाद्विवक्षितस्तुसन्धिर्भवतीतिनियमात्॥ ह्रस्वदी
र्घप्लुतभेदाःसवर्णाः॥ एतेषांह्रस्वदीर्घप्लुतभेदास्सजातीयाःपरस्प
रंसवर्णाभण्यन्ते॥ ऋऌवर्णौच॥ एकमात्रोह्रस्वः॥ द्विमात्रोदीर्घः
त्रिमात्रःप्लुतः॥ एऐओऔसन्ध्यक्षराणि॥ उभयेस्वराः॥ अकारादय

छन्दसिसर्वेविधयोविकल्प्यन्ते सहशब्दंविनापिसहार्थगम्यमानेतृतीयात्वमहंसिनेतिज्ञापकात्

यएकारादयश्चह्रस्वदीर्घप्लुतभेदाउभयेस्वराउच्यन्ते॥ अवर्णवर्जानामि
नः॥ अवर्णवर्जाःस्वरानामिनउच्यन्ते॥ हयवरल॰ञणनङम॰झढ
धघभ॰जडदगब॰खफछठथ॰चटतकप॰शषस॰आदन्तास्यान्॥
आद्यन्तौवर्णौमध्यगानामात्मीयसहितानांसंज्ञा॥ अव॰जव॰ऋप॰च
प॰एवमन्येपि॥ कार्य्यायेत॥ कार्यंविधातुमुच्चार्यमाणस्तत्संज्ञकोभ
वति॥ यस्येत्संज्ञातस्यलोपः॥ प्रसक्तादर्शनेलोपः॥ प्रसयादर्शनंलुक्
वर्णविरोधोलोपश्च॥ मित्रवदागमः शत्रुवदादेशः॥ स्वरानेतरितह

एकवर्णीताश यदि अमयस्योत्य जिम्यतिवर्णे तैवर्णोविरोधः॥१॥

अकारात्स्वमोवर्णाः तमाहुः पश्च कश्चन्दे उकारस्तत्र विख्यातो नान्यो भवितुमर्हति ॥१॥ विपरीतो ह्वारान्तु अकारावधिकत्व
तदर्थस्तु नाम्यन्तस्य धातोररेदो भवतीति ॥ उत्तरत्रापि अरेदो इत्यनुवर्तिष्यते ॥ अत्रोच्यते ॥ संज्ञापूर्वकत्वेन गुणविधेर
विधानबलात्प्रयोजनान्तराण्यनुमीयन्ते मिदेर्गुणः अक्षेर्गुण इत्यादीनि ॥१॥

सि॰ चं॰ ना॰ २

सः संयोगः ॥ कुं चुं टुं तुं पुं वर्जाः ॥ अरेदो नामिनो गुणः ॥ अर ए ओ एते
गुणसंज्ञकास्ते च नामिनः स्थाने भवन्ति ॥ आरै औ वृद्धिः ॥ आ आर
ऐ औ एते वृद्धिसंज्ञाः ॥ अन्त्यस्वरादिष्टिः ॥ अन्त्यो यः स्वरस्तदादि टिसं
ज्ञको भवति ॥ अन्त्यात्पूर्व उपधा ॥ अन्त्याद्वर्णमात्रात्पूर्वो यो वर्णः स
उपधासंज्ञको भवति ॥ ह्रस्वो लघुः ॥ विसर्गानुस्वारसंयोगपरो गुरुर्दी
र्घश्च ॥ मुखनासिकावचनोऽनुनासिकः ॥ विभक्त्यन्तं पदम् ॥ तपरः
स्वसमानकालस्य वर्णस्य ग्राहकः ॥ इति संज्ञाप्रकरणम् ॥ ॥ इयं च

आदिस्वरस्याऽऽशिन्त्यारैऔ इति सूत्रे
पितेष्वपि तुल्यत्वात् ॥ अथ पद्युपस्थितेषु
त्येतदर्थं संज्ञाविधानम् ॥ नस्फुरत्वं तु कविरिवा
लाप्रयोजनान्तराण्यनुमीयन्ते ॥ ऋजेर्वृद्धिः

नाम् ॥ तदेवोत्तरत्राऽप्यनुवर्त्यतां न चात उपधाया इत्यत्रारैऔ इत्यनुवृत्त्या चत्वारोपि स्युरिति वाच्यम् ॥ वृद्धिशब्देनोपस्था
स्यह्रस्वो विधास्यत इत्युच्यते ॥ तर्हि आपि तुल्यम् ॥ भागैरित्यादि लिङ्गाच्च ॥ अत्रोच्यते संज्ञापूर्वको विधिरनित्योपधायादि
रीत् ॥ अकचपीत् ॥ भूरिव ॥ अभवीदित्यादौ पाक्षिको वृद्ध्यभावः ॥ उत्तरार्थं च तत्त्वनुपदमेव वक्ष्यते ॥ यद्वा ॥ संज्ञाविधानव
लो तैर्वा वृद्धिर्हसादौ पीति च तुर्षु उर्णोतेर्वा वृद्धिः सोपे ॥ अतो हसादेर्लेर्वा वृद्धिः सेटि सावित्यादीनि ॥ ॥ गुरवे न
मः ॥

लाभार्थम् गुणा इत्यस्य स्थाने अरेदो नामिन इत्येव सूत्र्यताम् ॥
त्यत्वज्ञापनार्थं तेन तनादेरुपधाया गुणो वेपि यद्वा संज्ञा ॥

विरामोऽवसानः वर्णानामभावोऽवसानसंज्ञः स्यात्॥२॥

रे॥ ढुवर्णो यत्वमापाद्यते स्वरे परे॥ हसेर्हसः॥ स्वरात्परो रेफहकारव
र्जितो हसो हसे परेऽवसाने च वा द्विर्भवति॥ कृ चेजवाः॥ कृ वैसरैवां
कृ वे परे जवा न भवन्ति॥ वर्गो वर्गेण सवर्णः॥ स्वरहीनं परेण संयोज्य
म् दध्यानय॥ नपाद्यवलां वा द्विर्वाच्याः॥ द्वित्वं क्षस्यैव पस्यैव नो नयो
तु नयोरपि॥ दध्यानयादिषु बुधैर्बोध्यं रूपचतुष्टयम्॥ दध्यानय। द
ध्ध्यानय। दध्ध्यानय॥ रहाभ्यां द्विः॥ स्वरपूर्वो रेफहकाराभ्यां परो यमो
वा द्विर्भवति॥ गोर्य्यत्र॥ गोर्यत्र॥ नह्य्यस्ति॥ नह्यस्ति॥ पार्श्वम्॥ व

कृतारः। कीर्णीयुरिति बुध्या अपरोप्रसारितं कृप्पम्॥१॥ अक्ष्णोर्धस्यावयवे ह्यक्षमिन्द्रियकं मतमिति प्राप्नवतः॥२॥ अनन्त
रोक्तत्वाद्यादीनामेव यकारवकारौ गृह्येते इत्याशयेनाह अयादीनामिति॥ ननु ग्वौर्धौतौरित्यादावपि वर्णयोर्वर्णयोर्ग्रहणं
कस्मान्नेति चेत् आचार उपमानादित्याद्युक्तिलिंगात्॥२॥

जेयंमनः॥ कृपार्थे प्रसारितं कृप्पम्॥ कृयममत॥ अंसादेर्नूद्गिन्यास
वाक्कथ्यः॥ अंशौहिणी॥ प्रौढः॥ प्रौढिः॥ स्वैरम्॥ स्वैरी॥ स्वैरिणी॥ य्वो
र्लोपः शर्वा पदान्ते॥ पदान्ते स्थितानामपदीनां यकारवकारयो र्लोप
श्वा भवति॥ तआगताः तयागताः॥ पटइह॥ पटविह॥ तस्माइदम्
तस्मायिदम्॥ ताइह॥ ताविह॥ लोपश्शिन संधिः॥ आचार उपमाना
दिति ज्ञापकात्॥ नलोपश्शितु भवत्येव॥ स्वादेरिति निर्देशात्॥ दा
मोदरः॥ राजा रख॥ एदोतोतः॥ पदान्ते स्थितादेकारादोकाराच्च

कैन हरणमिह्यानुवर्तते तच्च व्यवस्थितविकल्पार्थं तेन पदान्ते ओकारान्तादोरतो वा लोपश्च एदोत इत्यत्र पूर्वदलेदकारनिर्देशो
नोत्तरदलेतदनिर्देशेन चेत ओ प्रौते॥ समासप्रत्यययोरिति विभक्तेर्लुकि प्रत्ययलक्षणेन पूर्वभागस्य पदत्वन्नोत्तरस्येति
एतदर्थमेवतपरकरणम्॥१॥

सवर्णसदृशस्य सस्वंबंधिकत्वात्सवर्णस्येतिलभ्यम् सवर्णसंज्ञा च समानस्यैव नान्यस्येति स्पष्टार्थम् समानस्येति ॥ आपर्जन्यवल्ल
क्षणप्रवृत्तिरिति दीर्घस्यापि दीर्घः ॥ यथा तल्लेस्य लेवैव मे घोवर्षति सर्वदा ॥ तद्वद्दीर्घस्य दीर्घत्वं ह्रस्वस्य खलु जायते ॥ ३॥ १०
हलीषेत्यत्र व्यपदेशिवद्भावेनेति ग्रहणं ॥ अमुख्ये मुख्यव्यवहारः व्यपदेशः ईषालाङ्गलपद्धतिः स्यादित्यमरः ॥ ६ ॥ गुरुस्वेनमः

सि·चं·ना· परस्याकारस्य लोपश्च भवति ॥ तेऽत्र ॥ पटोऽत्र ॥ गोऽग्रं ॥ गोऽजिनम्
४ गवाजिनम् ॥ गोऽग्रजिनम् ॥ सवर्णे दीर्घः सह ॥ समानस्य सवर्णे परे
सह दीर्घो भवति ॥ दैत्यारिः ॥ श्रीशः ॥ ईशः ॥ श्रीशः ॥ भानूदयः ॥
होतृकारः ॥ सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत् ॥ परेण पू
र्वबाधो वा प्रायशो दृश्यतामिह ॥ हलादेरीषादौ टेर्लोपो वक्तव्यः ॥
हलीषा लाङ्गलीषा ॥ मनीषा ॥ प्रयोगः ॥ शकन्धुः ॥ कर्कन्धुः ॥ कु
लटा ॥ पटिति ॥ सारङ्गः ॥ पशुपक्षिणोः ॥ साराङ्गोऽन्यः ॥ सीमन्तः ॥

बुद्धिर्मनीषाधिषणाधीः प्रज्ञा सेमुषी मतिरिति ॥ २ ॥

वाप्राद्ध्रस्य व्यवस्थितत्वाल्लोपाभावपक्षे प्रकृतिभावः ॥ ऊतिपूतिरित्यादिना पूतिशब्दो निपातितः ॥ वप्रा ह्रस्य व्यवस्थितत्वात् गो
अपवायावद्ध्रस्वेकयोगे कार्ये पृथक्योगाकरणं क्वचित्स्वरतोऽन्यत्रापि वपवादिप्रवृत्तिज्ञापनार्थम् ॥ तेन चकार्यं गव्यूतिः

सि·चं·ना· र्थेत्यादेः ॥ उवम् ॥ स्वरे ॥ मद्भवः ॥ सूत्रेऽस्मिन्दृष्टपदं सन्नान्तरादनुवर्त्त
२ नीयम् ॥ कारम् ॥ स्वरे ॥ पितृर्थः ॥ लृलम् ॥ स्वरे ॥ अनुबन्धः ॥ एअय
स्वरे ॥ नयनम् ॥ ओऽव ॥ स्वरे ॥ भवनम् गोरवा पदान्ते स्वरे ॥ टि॥
क्लितावाद्यन्तयोर्वक्तव्यो ॥ गवाग्रम् ॥ गोऽग्रम् ॥ गोऽग्रम् ॥ इन्द्राच
यो: परतो गोरङ् नित्यम् ॥ गवेन्द्रः ॥ गवाक्षः ॥ एआय ॥ स्वरे ॥ नायकः
औआव ॥ स्वरे ॥ पावकः ॥ क्वचित्स्वरवद्यकारः ॥ गव्यूतिः ॥ क्रोश
युगम् ॥ अन्यत्र गोयूतिः ॥ लव्यंजव्यं शक्यार्थे ॥ अन्यत्र लेयं पापम्

गव्यूतिरित्यादौ वृत्तोपेत ॥ ६ ॥ अव माधवः लाघवाय स्वओत इ
रित्यादौ सिद्धमित्याहुः ॥ ६ ॥

प्रकृष्टं ऋणमिति विग्रहः १ वत्सतरेणदेयमृणमित्यादि २ ऋणं स्थापनपनापयदन्यदृणं क्रियते तदृणार्णमित्यर्थः॥१८ दशार्णो देशः। नदीच दशार्णा रम्यस्तोदुर्गभूमौ तन्मलेच॥१॥

णे॥ प्रार्णम्॥ वत्सतरार्णम्॥ वसनार्णम्॥ कम्बलार्णम्॥ ऋणार्णम्॥ द
शार्णः॥ ऋतादौ नाम धातौ वा॥ प्रार्षभीयति॥ प्रर्षभीयति॥ ऌ अल्॥ अ
वर्णो ऌवर्णे परे सह अल् भवति॥ तवल्कारः॥ तवल्कारः॥ तवऌकारः॥ त
वऌकारः॥ ऌतादौ नाम धातौ वा॥ पल्लादस्त्रपोर्द्विर्वा॥ प्राल्कारीयति
प्राल्ल्कारीयति॥ प्रल्कारीयति॥ प्रऌकारीयति॥ ॥ इति स्वरसन्धिः
॥ नामि॥ अदसोऽमौ अश्वादयः संधिं न यान्ति॥ अमी अश्वादयाः॥ द्विवद्वि
त्वे॥ ईकारान्त उकारान्त एकारान्तश्च शब्दो द्वित्वे वर्तमानः संधिं न

यान्तु॥ अमनुवर्त्यव्यवस्थितो विकल्पः। तेनामोऽस्यास्तीत्यमीत्यत्र न। माधवस्त्वत्र एऐ ऐ इत्यत एइति सप्तम्यन्तमनुवर्त्तते। तेन एत्ते
कतेपश्चात्तातोऽमीशब्दः संधिं न याति। ईकार एव संधिं याति न त्वकारोपि नामीति ज्ञापकादिति भावः। अत्र नेति योगविभङ्ग
क्वचिदुक्तं नेति व्याख्येयम्। तेन वात प्रमीश्वासते इत्यासिध्यति॥२॥

ऋरित्यत्र सवर्णे दीर्घ इत्यतो दीर्घ इत्यनुवर्तते वा शब्दस्य निपतत्वात्क्वचित्प्रवर्त्ये॥ तेनावर्णस्य ऋवर्णेन सह भाव्यमानए
वान्दीर्घ भवतीति॥३॥

सि॰च॰ना॰ ५ रे सह ए भवति॥ तवेदम्॥ ममेदम्॥ उ ओ॥ अवर्ण उवर्णे परे सह ओ भ
वति॥ गङ्गोदकम्॥ ए ऐ ऐ॥ अवर्णो एकारे ऐकारे च परे सह ऐ कार भ
वति॥ तवैषा॥ तवैश्वर्यम्॥ ओ औ औ॥ अवर्णो ओवर्णे परे सह औ भ
वति॥ हसात्परस्य लोपो वा सवर्णे हसे॥ तवर्द्धिः॥ तवर्द्धिः॥ तवर्द्धिः
अवर्णान्तादुपसर्गादृकारादौ धातौ वार॥ उपार्च्छति॥ प्रार्च्छति॥
अवर्ण ऋते तृतीयासमासे॥ सुखार्तः॥ दुःखार्तः॥ शीतार्त्तः॥ तृती
यासमासे किम्॥ परमर्तः॥ प्रवत्सतरकम्बलवसनार्णदशानामृ

ओ ओ नो इत्यत्राप्योदृ इति योगविभागं कृत्वा अ ओ वा इति वानुवर्त्य अवर्णान्तादुपसर्गादोकारादौ धातौ नित्यमोकारः॥ नामधातौ तु वेति व्याख्येयम्। तेन उपोषति प्रोषीपति एवं बिम्बोष्ठः इत्याद्यपि निर्वाह्यम्॥ ८॥ एदोदादिकं च कृत्रिममकृत्रिमं च ग्राह्यम्॥ एत्येधत्योरिति निषेधज्ञापकात्॥ ७॥ एदिति योगविभागः कर्तव्यः तत्र वा ग्रहणं एङ्ग्रहणं वा ग्रहणं वानुवर्तनीयम्॥ व्यवस्थितविकल्पोयं तेनावर्णान्तादुपसर्गादेकारादौ धातौ नित्यमेकारः नामधातौ तु वा॥ ७॥

केशवेशे॥ सीमान्तोऽस्मः॥ ओत्वोष्ठयोः समासे वा बिम्बोष्ठः॥ स्थूलोतु॥
ओं ओं ओ॥ अवर्णादोकाकारे ओकारे च परे सह ओकारो भवति वि॥
म्बोष्ठः॥ स्थूलोतुः॥ समासे किम्॥ तवोष्ठः॥ एदोदादौ धातौ अवर्णान्तो
पसर्गस्य लोपः॥ प्रेजते उपोषति॥ एदोदादौ नामधातौ वा॥ उपेडकी
यति॥ उपेडकीयति॥ प्रोषीयति॥ प्रोषीयति॥ एत्येधत्योर्न॥ उपैति॥ उ
पैधति॥ प्रस्यैषैष्यपोर्न॥ प्रेषः॥ प्रैष्यः॥ प्रस्य किम्॥ अपेषः॥ एवे
ऽनवधारणे॥ अद्येव॥ अवर्णैणत्वे चैव॥ अद्य ए॥ अवर्णाद्विवर्णेप

सि॰चं॰ना॰
६
पाति॥ अग्नी अत्र॥ पटू अत्र॥ माले आनय॥ पचेते इमे॥ ओ निपातः॥
स्वरो निपातः संधिं न याति॥ अ अपेहि॥ इ इन्द्रं पश्य॥ उ उत्तिष्ठ॥ आ ए
वं मन्यसे॥ ओदन्तो निपातः॥ अहो ईशाः॥ अहो आगताः॥ अद
न्तो धौ वेतौ॥ विष्णो इति। विष्णविति॥ ऋणामसवर्णे स्वरे उसमासे प
दान्ते वा ह्रस्वः॥ चक्रि अत्र॥ चक्र्यत्र॥ मधु अकारः॥ मध्वकारः॥ म
धु एतत्॥ मध्वेतत्॥ कर्तृ इदम्॥ पदान्ते किम्॥ गौर्यौ॥ ह्रस्वविधान
सामर्थ्यान्न संधिः॥ समासे तु ह्रस्वार्थः॥ पदान्तानां समानानां प्रतिर्

अकारादित्वौकारात्तकौ प्रत्याहा इत्यभिप्रेत्याह स्वर इति॥ स्वनोप्येक एव वोध्यः न तु स्वरान्तस्यार्थे वेडन्तोरित्यादि निर्देशात्॥ ओ ओ नो इति सूत्रान्तरादुक्तस्तु
त्वा ओकारेत्तु वर्ज्ञेति॥ सत्त्वसामर्थ्यान्निपातस्य विशेषणम्॥ केवलस्य सिद्धत्वात्॥ तत्र ओकारान्तो निपातो न संधिं याति॥ ५॥ ईषदर्थे क्रियायोगे मर्यादाभि
विधेयत्वं॥ एवमनंतर्इविधाद्वव स्मरांवौ रडित्॥ पूर्वप्रक्रान्तवाक्यार्थस्यान्यथाद्योतको यमाकारः॥ पूर्वं मन्यसे नो ऽमंस्थाः इदानीं त्वेवं मन्यसे इत्यर्थः॥ ५॥

सि॰च॰ना॰ ७

वदत॥ देवदत्त॥ देवदत्त उ गुरोः किम्॥ वाक्याए दकारस्य माधु
त्॥ अन्ततः किम्॥ रुद्र॥ ॥ इति प्रकृतिभावः॥ ॥ चपाश्रवेज
वाः॥ पदान्ते वर्तमानाश्चपा जवा जवत्स्वे परे॥ षडत्र॥ वागथा
ञमे ञमा वा॥ पदान्ते वर्तमानाश्चपा ञमे परे ञमा वा स्युः॥ वरा
मम॥ षड्मम॥ वाङ्मधुरा॥ वाड मधुरा प्रत्यये ञमे जवस्यापि
नित्यं ञमाः स्युः॥ तन्मयम्॥ चिन्मयम्॥ चपाच्छः शः॥ चपाद्धु
तरस्य शकारस्य छो वा जवत्स्वे परे॥ वाक्छूरः॥ वाक्शूरः॥ अ

नतुचपाडस्यत्रवर्ग्यग्रहणात्किमित्यर्थं तर्हीतिचपात्तेनसहितःछः तस्यप्राप्ते
नविपरिणामं कृत्वा चपादिति व्याख्यास्यते॥ इतिचेन्नहि तं चादिना वाक्यद्वयमाश्रीयते॥ तत्राद्य उक्त एव॥ द्वितीयस्तु चपमे
मैपाश्शिपपाप्रश्नः॥ ननु चपाच्छस्य इत्युक्तेपि संदेह एव॥ किं शस्य छो वा छस्य शो वेति चेत् न छस्य शविधाने प्रयो
जनाभावात् लोकाच्छेषस्य लिंगाद्य॥२॥

शुभीतिनिर्विसर्गनिर्देशेनैतत् ज्ञापितम् खसपरे सप्रो विसर्गस्य लोपो भवतीति स्तोरिति सविसर्गनिर्देशो न तु तस्य पाक्षिकत्वं ज्ञापितम्॥ एतदर्थो विसर्गवचननिर्देशः॥३॥

वेकिम्॥ वाक्श्च्योतति॥ होझभाः॥ चपाद्धुतरस्य हकारस्य झभा वा
भवन्ति॥ पद्वर्गाश्चपः तद्वर्गगश्चतुर्थो भवति॥ तद्धविः तदहविः
वाग्घरिः॥ षडुढलानि॥ स्तोश्श्चुभिश्चुः॥ सकारतवर्गयोः शका
रचवर्गाभ्यां योगे शकारचव [illegible] र्गो भवतः॥ संख्यासाम्यं यथाक्रम
मस्ति चाच्चम्॥ कश्चरति॥ कश्शूरः॥ तच्चित्रम्॥ तच्छास्त्रम्॥ न
शात्॥ शकाराद्धुतरस्य तवर्गस्य चुत्वं न भवति॥ विश्नः प्रश्नः॥
ष्टुभिः ष्टुः॥ सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ

योगे इति नाध्याहार्यम् आकाङ्क्षितैकदेशपूरणमध्याहारः॥१॥

घोर्लोपश्चि त्यतः पदान्तइत्यनुवर्त्तते ॥ तेन पदान्ते वर्त्तमानादिति स्वार्थे लभ्यते किमर्थमन्त्यादिति ॥ नचश्रुत्वेपि सम्बध्यते
योगविभागेन पुनर्विधानार्थम् ॥ अन्त्यादिति विभज्यते अन्त्याद्धोः श्रुर्भवति क्वचित् ॥ नहि पदान्ते धकारः सं
न्त्यादिति विभज्यते ॥ अन्त्याद्धोः श्रुर्भवति क्वचित् ॥ अनेन द्रोरित्यस्य बाधः क्रियते ॥ तेन षस्सवति षस्सा

सि॰ चं॰ ना॰ नवतः ॥ कष्टः तट्टीकते ॥ नषि ॥ षकारे परे तवर्गस्य ष्टुत्वं न भवति
नवान्नषष्ट ॥ टोरन्त्यात् ॥ पदान्ते वर्तमानात् टवर्गात्परस्य स्तोः ष्टु
त्वं न भवति ॥ षण्नरः ॥ षड्नरः ॥ षट् सीदन्ति ॥ नवतिनगर्यो
र्न ॥ षण्णवतिः ॥ षण्णगर्य्यः ॥ सुपां न ॥ लिट्त्सु ॥ तोर्लि लः ॥ तव
र्गस्य लकारे परे लकारो भवति ॥ तल्लुनाति ॥ भवांल्लिखति ॥
अनुनासिकाननुनासिकत्वेन द्विधा यवलाः ॥ तत्र नकारस्या
नुनासिको लकारः ॥ उदः स्थास्तंभोः सलोपः ॥ उत्थानम् ॥ उ
नणान्तषीत्यत्र नत्रद्वपो पादानं श्चुत्वस्यानित्यत्वज्ञापनार्थं भिन्नप्रयेन तु सुपो नेति ॥ ५ ॥

तेन खलादिद्वयपरकात् ॥ नहि पदान्ते धकारः संभवतीति उच्यते योगविभागेन पुनर्विधानार्थम् ॥ अ
संभवति उच्यते योगविभाग इति सिद्धम् ॥ २ ॥

न२
वत्वस्यासिद्धत्वान्नानुस्वारः ओदन्तो निपात इत्याभ्येत सर्वं नम् वेसस्यानुवर्त्तेर्लभत इति बोध्यम् ॥ अ ह्लुत इत्यनुवर्त्तमाने
रित्येकोयोगः अस्य चोक्त एवार्थः स्लुत इत्यपरः अत्र दूराद्धूते इत्यनुवर्त्तते वेत्यनुवर्त्तते इतो वा स्लुतवद्गुणोनित्यः

ति वा ह्रस्वः ॥ ब्रह्म ऋषिः ॥ ब्रह्मर्षिः ॥ इति ऋषिः ॥ इराऽत्र ऋषिः ॥ मधुऋ
कारः ॥ मध्वृकारः ॥ होतृऌकारः ॥ होतॢकारः ॥ पदान्ता नामिति कि
म् ॥ अच्छैत ॥ नयादुओ वो वा स्वरे ॥ किमु उक्तम् ॥ किमुक्तम् ॥ दूरा
द्धूते ऽङ्घ्रुतः ॥ दूरात्संबोधने पदस्य वाक्यं तस्य टेः स्लुतो वा ॥ हे अघ
शापम्व ॥ हे ईश ॥ हपीश ॥ सप्तम्यर्थे ईर्न संधिं याति ॥ वातप्रमी अ
स्ते ॥ पथीइदम् ॥ यपी एषः ॥ इतो वा उत्र ॥ उइति ॥ विति ॥ अस्लुतव
द्गितो ॥ देवदत्तेत्ति ॥ गुणे रन्त्तो ऽनन्त्यस्यापि वापर्यायेण स्लुतः ॥ हे ३
स्लुतः ॥ स्लुतस्सन्धिं न याति ॥ एहि देवदत्त ॥ अत्राधीष्व ॥ हे हे प्रयो ३ हे ३ स्तयोः स्लुतो वा ध ॥
॥ त्रुटिः ॥
निपात इत्यनुवर्त्तते ततश्च निपातस्य स्लुत तावा भवति ॥ सन्न स्वरे सन्धिं न याति ॥ निषेधस्तु प्रकरणबलात्स्लुस्य ध्यः ॥ ६ ॥

तेन पदान्ते संज्ञकिमर्थम् ॥ योगविभागार्थमित्यवेहि ॥ दूराद्धूते

संयोगान्तस्यलोपइत्यत्रवावसानइत्यतोवेत्यपकृष्यतस्यव्यवस्थितत्वाश्रयणात्क्वचिन्नइत्याशयेनाह॥ पुंसोऽचपर इत्या
न नुमोंइतिसूत्र्यताम्॥ संज्ञापूर्वकोविधिरनित्योयथास्यादित्येवमर्थमिदम्॥ तेन सम्राडित्यादिसिद्धम्॥ वस्तुत
निर्देशेनास्यानित्यताज्ञापनात्सम्राडित्यादिसिद्धम्॥ अत्र मइति योगं विभज्यतत्रखकंचानुवर्त्यकचि
पुंस्युत्रइत्यादिसिध्यति॥ ४॥

दितेनख्यापितोब्राह्मणिनित्सयत्वेति इति सिद्धम्॥ ५॥
उसोऽत्रैकिं इति कॅ शब्देन॥ अस्त्रसोऽ अस्त्रासीत्यादि
विसमस्य समागम इति व्याख्येयम्॥ तेन पुंस्कोकिल इति

सि·सं·ना
९

म्लेच्छति॥ पदान्ताद्दीर्घाद्वा॥ लक्ष्मीच्छाया॥ लक्ष्मीछाया॥ आङ्·माङ्·भ्यां
नित्यम्॥ आच्छादयति॥ माच्छिदत्॥ पुंसोऽचपरे खयि संयोगान्तस्या
लोपः॥ पुंस्कोकिलः॥ पुंस्पुत्रः॥ अचपरे किम्॥ पुंक्षीरम्॥ खयि किम्
पुंदासः॥ रमातौवा॥ पुंसख्यातिः॥ पुंख्यातिः॥ मोऽनुस्वारः॥ मकार
स्यानुस्वारोभवति हसे पदान्ते॥ तं हसंति॥ पदं दृष्ट्वा॥ नश्चापदान्तेभ
से॥ नस्यमस्य चापदान्ते वर्त्तमानस्यानुस्वारोभवति भसे हकारे
चपरे॥ यशांसि॥ पुंसाम्॥ स्वनडुंहि॥ यमाययेऽस्य॥ अनुस्वार

अत्र होरुभाइत्यतोहकारोनुवर्त्यः॥ सचविभक्तिविपरिणामेनसप्तम्यन्तोबोध्य इत्याशयेनाह॥ हकारेचेति॥
नेत्यनुवर्त्यवाक्यभेदेनव्याख्येयम्॥ तत्श्चापदान्तस्यनस्यक्वचिदनुस्वारोनेत्यर्थः॥ तेन सुहिन्त्याभि
त्यादि सिध्यतीत्यहुः॥ ३॥

वेतिद्वितियसूत्रोपन्याससामर्थ्यादेतत्पदान्तविषयमित्याशयेनाह॥ पदान्तेवर्त्तमानस्येति वेतिव्यवस्थितोविकल्प
इत्यभिप्रेत्याह॥ यवलमनपरे हकार इति॥

स्ययमा नवंतिययेपरे॥ अस्यययस्य सवर्णो॥ शान्तः॥ अङ्कितः॥
कुण्ठितः॥ गुम्फितः॥ वाँ॥ पदान्तेवर्त्तमानस्यानुस्वारस्ययमावा
नवन्तिययेपरे॥ अस्यययस्य सवर्णः॥ त्वं करोषि॥ तं तनोतित
न्तनोति॥ संपन्ना॥ सम्पन्ना॥ संवत्सरः॥ सव्वँत्सरः॥ यंलोकम्॥ य
ल्लोँकम्॥ क्विबन्ते राजतौ परे समोमस्य म एव॥ सम्राट्॥ यवलमनप
रे हकारे मस्य यवलमना वा॥ किंह्यः॥ किय्ँह्यः॥ किंह्वलयति॥ कि
व्ँह्वलयति॥ किंह्लादयति॥ किल्ँह्लादयति॥ किंह्मलयति॥ किम्ह्मलयति॥ किंह्नु

वेतिव्यवस्थितविभाषाश्रयणात्॥ शसेइत्यारभ्यपकारेइतत्पर्यन्तंलभ्यम्॥१॥ वेतिव्यवस्थितत्वादेवप्राङ्‌खषष्ठइत्यत्र निषेधेन॥४॥

सि॰ चं॰ ना॰ १०

ते॥ किंइते॥ शसेचपरस्येति यो वा॥ वत्सरः॥ वथ्सरः॥ अप्सरः॥ अप्फ्सरः॥ नपदान्ते॥ तत्साधुः॥ कुकटुकवर्जितस्यविभक्तेन नवत्सु॥ टनात्सस्यवाधुट॥ षट्सेतः॥ षट्त्सन्तः॥ सन्सः॥ सन्त्सः॥ शसेङ्णोः कुकटुकौवा॥ प्राङ्‌षष्ठः॥ प्राङ्‌क्षष्ठः॥ प्राङ्‌ख्षष्ठः॥ सुगण्साधुः॥ सुगण्ट्साधुः॥ सुगण्ठसाधुः॥ पकारेपरेन्नस्यनसवा॥ स्रोर्विसर्गः॥ सकाररेफयोर्विसर्गोभवतिरसेपदान्तेच॥ धातोः पदान्तेनतुरसे॥ कुंप्वोः ᳵकᳵपौवा॥ कवर्गेचपरेविस पवर्गे१

र्जनीयस्यवा विसर्जनीयस्य ...

यो: परतोविसर्जनीयस्यसोविधीयते॥ भास्करइत्यादिवाक्याविरुद्धंचेदम्॥ ᳵकᳵपयोर्विधानात्‌ नः सगित्यनुष्का नृम्ह: पाहिइत्यादिसिध्यति अत्रइणकोइत्यतइकारोकारोनपीत्यतः पीतिमराद्रुकतुत्यानुवर्त्य विभक्तिर्थयन्ते॥२॥

नमः नह्यतां नन्तेवानुवर्त्त्यवाक्यभेदेनसंवध्यतनस्थानिकस्यनस्यनेतिव्याख्येयमित्याहुः॥१॥ पदस्येतिकिं॥ इदंश कुत्वविधिस्तुवाभ्याम्नक्षतीत्यादावेकपदस्थेचवर्गेसावकाशः॥ चपाछ्‌ः नत्वयुक्तोछसादाविषयादिनिर्दे

तंन्नम्॥ नः संकछते॥ नान्तस्यपदस्यावपरेछतेसगागमोनवी त॥ राजंश्चित्रम्॥ नवास्ततनोति॥ अवपरेकिम्॥ सन्त्सरुः॥ नप्शान्तनोति॥ शंवकवा॥ नान्तस्यपदस्यावपरेशेनाचेयागमोभव ति॥ नवाञ्छूरः॥ नवाञ्च्छूरः॥ नवाञ्शूरः॥ ङ्णोह्रस्वादिः स्वरे॥ ङकारणकारनकाराह्रस्वादुत्तराद्विर्भवन्ति स्वरेपरेपदान्ते॥ प्रत्याङ्ङिदम्॥ सुगण्णिह॥ राजन्निह॥ छः॥ ह्रस्वात्परश्छकारोद्विर्भवति॥ खवसेचयामसानाम्॥ तवच्छत्रम्॥ दीर्घात्‌॥ ह्रीच्छति

संवध्यते॥ विकल्पस्तुव्यवस्थितः॥ तेनपदान्तेदीर्घादाङ्‌माङ्‌वर्जिताद्वा॥ अत्रह्रस्वादितिनानुवर्त्यम्॥ स्वरे इत्यनुवर्त्यविभक्तिव्यत्ययेनस्वरादितिबोध्यम्॥२॥

सि·चं·ना:
११

त्रम॥पशस्कल्पम॥पशस्कम॥पशस्काम्यति॥सर्पिष्पासम॥सर्पि
ष्कल्पम॥सर्पिष्कामति॥नमस्करोत्ति॥पुरस्करोत्ति।निष्प्रत्यहम।
आविष्कृतम॥तिरस्कर्त्ता॥द्विष्करोति।द्विः करोति।त्रिष्करोति॥त्रिः
करोति॥चतुष्कपालः॥धनुष्करोति॥धनुः करोति॥सर्पिष्करि
का॥अपस्कारः॥अमस्कुम्भः॥अपस्पात्रम॥अपस्सहिताकुशा
अपसकुशा॥अपस्कर्णी॥अधस्पदम॥शिरस्पदम॥प्राहृत्ति
गणेपम॥रोरात्रिषु॥अहोविसर्गस्यपदान्तेरो भवति।नतुराआ

मुख्यप्रयोजस्तुगतमहोरात्रिरेखा॥९॥ अत्रैवमहे सैतिपरिलोपान्नअखसलाभोभवति॥४॥

दिषु॥अहर्गणः॥अहरहः॥रात्र्यादिषुतु॥अहोरात्रः॥अहोरूपम॥
अहोरथन्तरम॥अतोऽत्सुः॥अकारात्परस्य विसर्गस्य उकारो भव
त्यतिपरतः॥कोऽर्थः॥हवे॥अकारात्परस्य विसर्गस्योकारो भव
हवेपरे॥देवोयाति॥मनोरथः॥आँदवेँलोपश्च॥अवर्णात्परस्य
विसर्गस्य लोपश्च भवत्यते वेपरे॥देवा अत्र॥वातावान्ति॥स्वरेपह
म्बा॥अवर्णात्परस्य विसर्गस्य स्वरेपरे पत्वम्वा॥देवाईह॥देवापि
ह॥भोसः॥भोस भोगोस घोसद्र्स्येत्तस्य विसर्गस्य लोपश्च भवत्य

सि.बे.ना
१२

वेपरे॥ नोहरे॥ नोगोनमस्ते॥ अधोपाहि॥ स्वरेपत्वम्वा॥ नोपि
द्ध॥ नोगोपिद्ध॥ अधोपपगच्छ॥ नामिनोरः॥ नामिनःपरस्यविस
र्गस्यरेफोभवत्यवेपरे॥ अग्निरत्र॥ पटुर्वक्ता॥ रेफप्रकृतिकस्य
स्वपेवा॥ योः पतिः॥ गिर्पतिः॥ अहःपतिः॥ अहर्पतिः॥ रेफप्रकृ
ति कस्यविसर्गस्यरेफोभवत्यवेपरे॥ प्रातरत्र॥ अन्तर्गतः॥ रि
लोपोदीर्घश्च॥ रेफस्यरेफेपरेलोपोभवतिपूर्वस्यचदीर्घः॥ पुना
रमते॥ हरीराजते॥ नान्रम्य॥ सैषाद्वसे॥ सषाढ्वादेषषाढ्वा॥

अनुक्तसमुच्चयार्थश्चकारः तेनस्वपेवेत्युक्तवार्त्तिकेंलब्धमित्याहुः॥ अःसइतेऽभावादुक्तेसर्वादीनांस
तच्छद्दस्यानुकरणम्॥ तत्साहचर्यादेषशब्दोप्येतच्छद्दस्यैव अर्थमात्रतात्पर्योच्चारणविषयकमनु
र्वकार्याभावोज्ञापितः॥ सधातुरित्यादिज्ञापकात्॥
ष्येम्॥ अहदमाःत्रतात्पर्योच्चारविषयकमनुकरणम्॥१॥

विसर्गस्यसइतितुनोक्तं पर्यायेणद्वयोरखलाघवयोरनपेक्षत्वात्॥ अःसइतिसूत्रणपिठेयद्विसर्जनीयस्येत्युक्तंतत्संज्ञापूर्वक
त्वम्॥ अत्रवेत्यनुवृत्तस्यव्यवस्थितत्वाश्रयणात्॥ प्रासपरेखसइति॥ अस्मिन्नर्थेवाक्षेपोः प्रातुरित्यादिनिर्देशोप्य
त्वेनसस्यानित्यत्वबोधनार्थम्॥ तेनकःसाधुरित्यादिसि
द्ध्यनुकूलः॥२॥ भिन्नानुपूर्वीकः शब्दएकार्थप्रतिपादकःप
र्यायः॥१॥

र्भस्यषः कऽपौवाभवतः न्हंऽपाहि॥ न्हंःपाहि॥ न्हन्पाहि॥ ॥इतिहस
संधिः॥ ॥विसर्जनीयस्यसः॥ खसेपरे॥ कस्तनोति॥ प्रासपरेख
सेविसर्जनीयस्यविसर्गएव॥ कः त्सरुः॥ रामः सोता॥ घनाघनः क्षो
भनः॥ शसेवा॥ कः शरः॥ कश्शरः॥ कः षण्ढः॥ कष्षण्ढः॥ कस्साधुः
कःसाधुः॥ खसपरेशसेविसर्गलोपोवा॥ हरिस्फुरति॥ हरिःस्फु
रति॥ वाचस्पत्यादयोनिपातात्सिध्यन्ति॥ वाचस्पतिः॥ बृहस्पतिः॥
तस्करः॥ कौतस्कुतः॥ कानकान्॥ कांस्कान्॥ भास्करः॥ पयस्पा
॥हरिस्फुरति॥ कुप्वोः ऽकऽपौवा॥ कऽकरोति॥ कःकरोति॥ कऽपचति॥ कःपचति॥ २॥

सोनइत्यावर्त्यशसोनकारस्यसकारइतिव्याख्येयम्॥इष्टसिध्यर्थमिहतेनजाः इत्यादिसिद्धम्॥४॥

सि॰ चे भाः
१३

योभवन्ति॥एकत्वद्वित्वबहुत्वेषु॥एकवचनद्विवचनबहुवच
नानि॥सोविसर्गः॥देवः।देवौ॥जसोजकारोजसीतिविशेषणार्थः
देवाः॥अम्शसोरस्य॥समानात्परयोरम्शसोरकारस्यलोपोभव
ति॥देवम्॥देवौ॥शसःशकारःशसीतिविशेषणार्थः॥सोनःपुंसः
पुल्लिङ्गात्समानात्परस्यशसःसकारस्यनकारादेशोभवति॥न
त्वाम्शसीत्यात्वे॥शसि॥शसिपरेपूर्वस्यदीर्घोभवति॥पदादेश
स्तद्वद्भवति॥नतुवर्णमात्रविधौ॥देवान्॥टेन॥अकारात्पर

दिधिः॥वर्णमात्रस्यविधिः॥वर्णमात्रेविधिरितिचतुर्थीसमासः॥वर्णमात्रेतीतिकिम्॥वरस्केनेत्यत्ररा
तिकिम्॥देवानित्यत्रविसर्गोयथानस्यात्॥वर्णमात्रेइतिकिम्॥देवइष्टइत्यत्रविसर्गोस्योत्वंयथानस्यात्॥

भभिन्सः इतिच्छेदः॥यद्वा॥भभ्यइतिच्छेदः॥अकारात्परस्यभ्यसोभकारइत्यर्थोस्तु॥अत्राकारोवास्वित्यतोऽनुवर्त्तते॥एवंभि
त्सवर्णोदीर्घंबाधित्वाप्येवमेव॥अन्यथासमानाद्देर्लोपइत्यतोलोपमनुवर्त्यलोपमेवव्यधास्यत्॥यद्वा॥भइत्येवास्तुभीतिपूर्व
दिप्रकरणंभित्वान्यसाद्विपीयते॥अतःप्रोठःपापयतीत्यादिसिद्धम्॥२॥

स्यइनभवति॥देवेन॥आङ्कि॥अकारआभवतिभकारादौस्यादौपरे
देवाभ्याम्॥भ्यः॥अकारात्परस्यभिसोभकारस्याकारादेशोभवति
अचूए॥एऐऐ॥देवैः॥ङे॰ऽक॥अकारात्परस्यङे॰इत्येतस्यागागमो
भवति॥देवाय॥देवाभ्याम्॥एस्मिबहुत्वे॥अकारस्यैत्वंभवतिस
कारभकारादौस्यादौपरेबहुत्वेसति॥देवभ्यः॥ङसिरत्॥अकार
त्परोङसिरद्भवति॥देवात्॥ङस्स्य॥अकारात्परोङस्स्योभवति।
देवस्य॥ओसि॥अकारस्यओसिपरेएत्वंभवति॥एअए॥देवयोः

सेस्तइत्येवसुवचम्॥नचदेवइत्यत्राप्यतिव्याप्तिः॥स्वान्यादेरित्यादिलिंगेनातिव्याप्तिवारणात्॥नचामर्थंतदितिवाच्यम्॥
छः इत्यादिलिंगात्॥३॥

अत्रवक्ष्येह्रस्वादितिसस्त्रान्मराद्धकहृत्याह्रस्वादिति॰पुंसइतिचानुवर्त्यपुंसितुह्रस्वदेव॥२॥सतोहिकाप्पिरा: कार्प्यराभवितव्य
कनिर्देशोनषत्वत्वसत्वस्यापिक्वचिद्विध्यर्थत्तत:सिस्वेदपिषतिसिस्वादपिषतिसिसाहयिषतिनिसेसिय्यतेइत्यादौसत्वमपि
मितिसःस्य इतिनिर्देशकेवलविसर्गइतिनिर्देश: ॥अथस्य इतिद्विसकार
भवतितद्विधेसामर्थ्यात्सुपत:कृतत्वा॥३॥

सि॰चे॰भा:
२४

देवआम् इतिस्थिते॥नुडामः॥समानात्परस्यामोनुडागमोभवति
पुंसितुह्रस्वादेव।नामि॥पूर्वस्यदीर्घोभवतिनामिपरे॥देवाना
म्॥देवे॥देवयो:॥किंलाभिस:कृतस्यकवर्गादिनाचपत्याश्च
तत्परस्यकेनचित्तत्रणिकृतसरकद्रसकास्यषकारादेशोभवत्य
न्तेस्थितस्यनभवति॥देवेषु॥सिर्द्धि:॥आमंत्रणेसिर्द्धिर्भवति॥
समानाद्धेर्लोपोधातो:॥ह्रस्वात्समानादेदोतश्चोत्तरस्यधेर्लोपोभ
वत्यधातो:॥आभिमुख्याभिव्यक्तयेहेशब्दस्यप्राक्प्रयोग:दे

रिलोपोदीर्घश्चेतिसूत्रेलोपश्चोनुवर्त्तनात्॥रिदीर्घश्चेतिवक्तव्येलोपश्चग्रहणमुत्तरार्थमित्याशयेनाह॥सपश्चादिति॥२॥
सेरिकारोत्वसो:सावित्यादौसीत्युक्तेसकारादिलाभसंभवात्।नवेष्टापत्ति:॥वेधस्युइत्यादावपिदीर्घत्वसंभवात्॥५॥

ष्पपरस्यविसर्गस्यलोपोभवतिह्सेपरे॥सचरति॥एषहसति॥सश
ब्दाद्विसर्गस्यलोप:स्वरेलोपएवपादपूर्णेचेत्॥सैषदासरथीराम:
सैषराजायुधिष्ठिर:॥सैषकर्णोमिहात्यागीसैषभीमोमहाबल:॥ ॥
इतिविसर्गसंधि:॥ ॥अथविभक्तिनाम॥विभक्तिरहितंधातुवर्जि
तंचार्थवच्छब्दरूपंनामोच्यते॥तस्मात्॥सि॰औ॰जस॰अम॰औ॰
शस॰टा॰भ्याम॰भिस॰डे॰॰भ्याम॰भ्यस॰ङ॰सि॰भ्याम॰भ्यस॰ङ॰स
ओस॰आम॰ङि॰ओस॰सुप॰॥नाम्नःपरा:स्यादयस्सप्तविभक्त

॥आत्याम्आसोरस्येत्यतोमण्डूकप्लुत्याऽस्येत्यनुवर्त्तते॥२॥

रेपि॥अवप्रत्याहारेणकवर्गेणपवर्गेणानुस्वारेणविसर्गेणऽकऽपाभ्यां
चमध्येव्यवधानेपिभवतिनाम्येन॥सर्वेण॥सर्वादिःस्मट्॥सर्वादेरका
रान्तात्परस्यङेइत्येतस्यस्मडागमोभवति॥सर्वस्मै॥अतःसर्वादेर
कारान्तात्परस्यातःस्मडागमोभवति॥सर्वस्मात्॥सुडामः॥सर्वादे
वर्णान्तात्परस्यामःसुडागमोभवति॥सर्वेषाम्॥ङिःस्मिन्॥सर्वादे
रकारान्तात्परेङिःस्मिन्भवति॥सर्वस्मिन्॥शेषंदेववत्॥एवंवि
श्वादयः॥डतरडतमौप्रत्ययौ॥ततस्तदन्ताश्शब्दाग्राह्याः॥पूर्वा

एतत्सूत्रन्तुत्रसीसर्वादेःस्मट्अतःङिःस्मिन्नितिसूत्रचतुष्टयेवेत्यनुवर्त्यबोध्यम्॥३॥स्वार्थविप्रकृष्टंपरार्थीबलेनसंयोगम्॥४॥
स्वाभिधेयापेक्षोऽवधिनियमोव्यवस्था अवधेर्नियमःकीदृशःस्वस्यपूर्वादेरभिधेयंवाच्यंभूम्यादितदपेक्षतेइत्यर्थःदिशः
सपत्नीभवदक्षिणस्याः इत्यादावपिव्यवस्थास्त्येव॥५॥

दीनांनवानांजस्ङसिङीनांशीस्मात्स्मिनोवा॥पूर्वे॥पूर्वस्मात्
पूर्वात्॥पूर्वस्मिन्॥पूर्वे॥एवंपरादयः॥सर्वादिःसर्वकार्यःस्यान्नचे
द्गौणोऽथवानिधा॥पूर्वादिष्वव्यवस्थायांसमोतुल्येन्तरोपुरि॥परि
धानेबहिर्योगेस्वोऽर्थज्ञात्यन्यवाच्यपि॥सर्वमतिक्रान्तोऽतिसर्वः
तस्मैअतिसर्वायदेहि॥प्रियःसर्वोयस्यप्रियसर्वस्तस्मैप्रियस
र्वाय॥सर्वोनामकश्चित्तस्मैसर्वाय॥अतिपूर्वाय॥समायतुल्या
य॥अन्तरायांपुरिग्रामयोरन्तरेतापसः मध्यइत्यर्थः॥अन्तरेच

यथवस्थितविभाषाश्रयणात् ॥४॥ प्रथमान्तेन समासः ॥ परिनिष्ठितविभक्त्या वा ॥५॥

सि॰ च॰ ना॰
१६

न्तरा वा शाटकाः परिधानीया इत्यर्थः ॥ अन्तरे अन्तरा वा चाण्डालस्य
गृहा बाह्या इत्यर्थः ॥ स्वा पध नायज्ञातयेना ॥ स्वस्मै आत्मने ॥ द्वन्द्वे
सर्वादीनां तस्य सर्वकार्यम् ॥ पूर्वापरावराणाम् ॥ वा जसि ॥ वर्णाश्र
मेतरे ॥ वर्णाश्रमेतराः ॥ तृतीयासमासे तृतीयासमासार्थवाक्ये च
न ॥ मासेन पूर्वाय ॥ मासपूर्वाय ॥ प्रथमचरमतयअयअल्पार्द्धकति
पयनेमानां जसि वा ॥ प्रथमे ॥ प्रथमाः ॥ तयअयपटौ प्रत्ययौ ॥ ततस्त
दन्ताः शब्दा ग्राह्याः ॥ द्वितयाः ॥ शेषं देववत् ॥ नेमे ॥ नेमाः ॥ शेषं सर्व

२

अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् ॥ द्विबहुविषये निर्द्धारणे वर्त्तेते ॥ तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा ॥ ३ ॥ इतरश
ब्दाकेच स्यान्मर्यादावचद्वयोः ॥ ३ ॥ त्वत् त्व इत्यन्यपर्यायौ ॥ ३ ॥ नेम इत्यर्द्धे ॥ ३ ॥ पूर्वपरावरोत्तरापराः पश्चाद्दिक्कालयोस्तद्वाच्छि
न्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्येषु ॥ छिद्रात्मीयविनावहिरवसरमध्ये ऽन्तरात्मनि चेति ॥ ३ ॥ त्यदतद पूर्वोक्तप
क्षेवेच ॥ ४ ॥ एतद्विदमो प्रत्यक्षोपस्थितौ ॥ ४ ॥ इकारप्रश्लेषः किमर्थमिति चेत्सत्यम् प्रथमादिभ्यो विध्यर्थः ॥ ५ ॥

देव ॥ हे देवौ ॥ हे देवाः ॥ एवं घटपटरामकृष्णादयः ॥ सर्व॰ विश्व॰ उभ॰ उ
भय॰ अन्य॰ अन्यतर॰ इतर॰ उतर॰ उतम॰ सम॰ सिम॰ त्वत्॰ त्व॰ नवतु
नेम॰ एक॰ पूर्व॰ पर॰ अवर॰ दक्षिण॰ उत्तर॰ अपर॰ अधर॰ स्व॰ अन्तर॰
त्यद्॰ तद्॰ यद्॰ एतद्॰ इदम्॰ अदस्॰ द्वि॰ किम्॰ युष्मद्॰ अस्मद्॰ ॥ एते
सर्वादयस्त्रिलिङ्गाः ॥ जसी ॥ सर्वादेरकारान्तात्परो जस् ई र्भवति ॥ सर्वे
षुर्नो णो नन्ते ॥ षकाररेफऋवर्णेभ्यः परस्य नकारस्यैकपदस्थस्य ण
कारादेशो न च स नन्ते स्थितस्य न भवति सर्वानित्यादौ ॥ अवकुम्बाने

॥ धातोर्नामिन इत्यादिनिर्द्देशोनैकपदस्यैवास्य स्वीकारात् ॥ अथैवं रामनामेति इत्यादावपि न णत्वम् ॥ रार्जनद्रेत्या
अथ हरिकामेरोत्यादौ कथमिति वाच्यम् ॥ ज्ञापकसिद्धं न सर्वत्रेत्याश्रयणात् ॥ ३ ॥ ॥ अपि तद्दोऽनुक्तसमु
पिरोभवति ॥ कुप्ववान्तरेपीति सुवचम् स्वराद्यदन्तस्यैतस्य पदिपरत्वाद्वत्वं नदीम् ॥ १ ॥

स्पतेर्द्वेति अव सानयवनतः सापराह्णः नतु मन्तमव्ययम् मन्लोपस्यादर्शनात् ॥१॥

जरौ॥ निर्जरसः। निर्जराः॥ यत्तेहसादौ चदेववत्॥ संख्याविसाय
पूर्वस्याह्नस्याहन्वाङौ॥ वेङ्यो॥ अन्नन्तस्योपधापालोपोवास्यदी
ङि॥ इत्येतयोः परयोः॥ मकारवकारान्तसंयोगादुतरस्यन॥ द्वयो
रन्होस्समाहारः॥ द्व्यन्हः द्व्यन्हि॥ द्व्यहनि॥ द्व्यन्हे॥ विगतमह॥
व्यन्हः॥ व्यन्हि। व्यहनि॥ व्यन्हे॥ अन्हः सायः। सायान्हः॥ सायान्हि
सायाहनि॥ सायान्हे॥ पाद्दन्तनासिकामासहृदयनिशाऽस्र
ज्यूषदोषयकृतशकृतउदकआस्यमांसपृतनासानुनाम्॥

पद्दत्नसमासहृद्निशस्रसन्यूषन्दोषन्यकन्शकन्उद
नआसन्मांसयत्नसुशसादौवा॥ पदः॥ पदा॥ पद्भ्याम्। पद्भिः।
दतः॥ दता। दद्भ्याम्॥ मासः॥ मासा॥ माभ्याम्॥ मासाभ्याम्॥ अप्रष्ठो
पः स्वरेऽव्ययुक्ताच्छसादौ॥ अन्नन्तस्योपधालोपो भवति शसा
दौ स्वरे। मकारवकारान्तसंयोगादुतस्यन॥ षण्योगेऽस्न॥ यूष्णः
॥ यूष्णा॥ नाम्नो नो लोपश्धौ॥ नान्तस्य नाम्नो नो लोपश्च भवति र
सेयदान्ते चाधौ॥ यूषभ्याम्॥ यूषभिः॥ यत्तेयज्वसु चदेववत्॥

पदादयः पृथक्शब्दा इत्येके॥ सोमपाः॥ सोमपौ॥ सोमपाः॥ सो
मपाम्॥ सोमपौ॥ आतो धातोर्लोपः॥ धातुसम्बन्धिन आकारस्य
लोपो भवति शसादौ स्वरे परे॥ सोमपः॥ सोमपा॥ सोमपाभ्याम्॥
सोमपाभिः॥ एवं कीलालपाविश्वपाशङ्खध्मादयः॥ हाहेति किम्
॥ हाहान्॥ हाहै॥ हाहाः॥ हाहे॥ हरिः॥ औघ्रू॥ इकारान्तादुकारा
न्ताच्च परे औरपि आपद्यते ई ऊ भवतः॥ हरी॥ एओ जसि॥ इकारान्त
स्योकारान्तस्य च जसि परे एकार ओकारश्च भवति॥ हरयः॥ भो

वत्॥ तीयस्य ङित्सु वा सर्वनामवद्रूपम्॥ द्वितीयस्मै॥ द्वितीयाय॥ द्वि
तीयस्मात्॥ द्वितीयात्॥ द्वितीयस्मिन्॥ द्वितीये॥ एवं तृतीयः॥
उभशब्दो नित्यं द्विवचनान्तः॥ उभौ॥२॥ उभाभ्याम्॥३॥ उभयोः॥
२॥ उभयशब्दस्य द्विवचनं नास्तीत्येके॥ अस्तीत्यन्ये॥ उभयः॥
उभयौ॥ उभये॥ निर्जरः जराया स्वरादौ जरस् वा वाच्यः॥ तद
न्तविधिरत्र॥ षष्ठीनिर्दिष्टस्यादेशास्तदन्तस्य ज्ञेयाः॥ गुरुः शिष्य
सर्वस्य वक्तव्यः॥ निर्दिश्यमानस्यादेशा भवन्ति॥ निर्जरसौ॥ नि

१अपङनालेपिनजसिविकल्पः व्यवस्थितत्वात्॥ एकदेशविकृतमनन्यवत्॥ नहि कर्त्तोपु छी गच्छिते ष्वाश्चेवनाष्वैनिनगई भः१

सि॰च॰ना॰ न्यादय:॥ उकारान्ताविसुवायुभान्वादय:॥ भानु:॥ भानू॥ भान
१८ व:॥ सेर्डौधे:॥ सखिशब्दात्तदन्ताच्च परस्य सेरधे डा भवति॥ स
खा॥ हे सखे॥ ए सखयु:॥ सखिशब्दस्य तदन्तस्यचैकारादेशो
भवति धिवर्जितेषु पञ्चसु॥ सखायौ॥ सखाय:॥ सखायम्॥ स
खायौ॥ सखीन्॥ दीर्घत्वान्नन॥ सखिपत्योरीङ॥ ङे॰ सखिप
तिशब्दयोरीगागमो भवति राङे॰ सु परत:॥ सख्या॥ सख्ये॥ ङ ङि॰२
ङु॥ सखिपतिशब्दयोर्नागमो भवति ङ॰सि ङ॰सोरकारे परे

ख्यतो ङ॰उ॰॥ अकारान्तात्सख्यङ॰सिङ॰सोरकारस्य उकारो भवति स च डित
सख्यु:॥ सखिभ्याम्॥ सखिभ्य:॥ सख्यु:॥ ङे॰ नौङिदित्यौकारे सख्यौ
ते सखिपत्योरीक॥ सख्यौ॥ शेषं नव: सखा सुसखा॥ सुसखा
यौ॥ सुसखिना॥ सुसखये॥ सुसखे:॥ सुसखौ॥ अतिशायि
त: सखा अतिसखा॥ परम: सखा परमसखा॥ परमसखा
यौ॥ परमसखिना॥ सखीमतिक्रान्तोऽतिसखि:॥ इह डेत्वे
न लक्षणप्रतिपदोक्तयो: प्रतिपदोक्तस्यैव ग्रहणमिति न्याया

त॥पतिः॥पती॥पतयः॥पत्या॥पत्युः॥पत्यौ॥पतिस्समासेह
रिवत॥भूपतये॥आगमजमनित्यम्॥सखिना॥पतिना॥द्वि
शब्दोनित्यंद्विवचनान्तः॥त्यदादेष्टेरस्यादौ॥द्वौ२॥द्वाभ्या
म्॥३॥द्वयोः॥७॥संज्ञोपसर्जनयोर्नात्वम्॥द्वावतिक्रान्तोऽ
तिद्विः॥द्विर्नामकश्चित्॥द्विः॥द्वौ॥द्वयः॥प्राधान्येतु॥परम
द्वौ॥त्रिशब्दोनित्यंबहुवचनान्तः॥त्रयः॥त्रीन्॥त्रिभिः॥त्रिभ्यः
॥७॥त्रेस्त्रयङ्॥त्रिशब्दस्यापङादेशोभवतिनम्पिपरे॥तदन्त

॥इकारान्तस्योकारान्तस्य घेधौपरेएकारओकारश्चभवति॥हेहरे
॥हेहरी॥हेहरयः॥हरिम्॥हरी॥हरीन्॥टानास्त्रियाम्॥इकारान्तो
दुकारान्तस्यवङिति परेएकारओकारश्चभवति॥हरये॥हरिभ्या
म्॥हरिभ्यः॥उ.स्य॥एदोद्भ्यांपरस्यङसिङसोरकारस्यलोपश्चभव
ति॥हरेः॥हरिभ्याम्॥हरिभ्यः॥हरेः॥हर्योः॥हरीणाम्॥ङेःरौङितः॥इ
दुद्भ्यामुत्तरस्यङेर्नोभवतिसचङित्॥ङितिटेः॥ङितिपरेटेर्लोपो
भवति॥हरौ॥हर्योः॥हरिषु॥एवमग्निगिरिरविकविकलिमु॥

तप्रमीभ्याम्॥ वातप्रमीभिः॥ वातप्रम्योः॥ वातप्रमीषु॥ एवं ययीप
पप्यादयः॥ क्विबन्तवातप्रमीशब्दस्यामिशसिङौ च विशेषः॥ वातप्र
म्यम्॥ वातप्रम्यः॥ वातप्रम्यि॥ ह्वौवेतियः॥ बहुश्रेयस्यापस्पस
वहुश्रेयसी॥ ईदूदन्तस्य इयुवङ्स्थानं नित्यस्त्र्याख्यस्योपसर्जन
त्वेऽपि स्त्रीकार्यं वक्तव्यम्॥ हसेपसे र्लोपः॥ हसान्तादीबन्ताच्च
परस्य से र्लोपो भवति॥ धोर्ह्रस्वः॥ इयुवङ्स्थानवर्जितयोरीदूतोः
स्त्रीशब्दस्य च स्त्रियो धौ परे ह्रस्वविधानसामर्थ्याद्धावितिन॥ हे व हृत्वः

हुश्रेयसि॥ बहुश्रेयसीम्॥ बहुश्रेयस्यौ॥ बहुश्रेयसीन्॥ ङितामट्
॥ स्त्रियामीकारान्तादूकारान्ताच्च ङितामडागमो भवति॥ बहुश्रे
यस्यै॥ बहुश्रेयस्याः॥ बहुश्रेयसीनाम्॥ स्त्रियां यो॥ इवर्णान्तादुव
र्णान्ताच्च स्त्रियां वर्तमानात्सरस्य ङे·नामादेशो भवति॥ बहुश्रेय
स्याम्॥ अनीबन्तत्वान्न सिलोपः॥ अतिलक्ष्मीः॥ शेषं बहुश्रेयसी
वत्॥ सुश्रीः॥ ह्वौ ईतोरियुवोऽस्वरे॥ धातोरिवर्णोवर्णयोरियुवौ
भवतः स्यादौ स्वरे परे॥ सुश्रियौ॥ सुश्रियः॥ एवं सुधीयवक्रादयः॥

सेनानीः॥ द्यौवा॥ अनेकस्वरस्य नाम्नो धातोरिवर्णोवर्णयोर्यका
रवकारौ भवतः॥ स्वरेपरे॥ धातोरवयवसंयोगः पूर्वोयस्मात्र
स्यात्तन॥ सोपपदस्यानेकस्वरस्यचेदुपसर्गकारक पूर्वोसेवना
न्यपूर्वस्य॥ वर्षाकरदन्वपुनरपूर्वं न्यप्राब्दादन्यमपूशाब्दस्यसु
धीशब्दस्य चन॥ सेनान्यौ॥ सेनान्यः॥ नियः॥ नीशब्दादुत्तरस्य
ङेः रामादेशो भवति॥ सेनान्याम्॥ एवं सुनी ग्रधी ग्रामण्यादयः
॥ धातुनासंयोगविशेषणात्॥ उन्न्यौ उपसर्गकारकपूर्वस्यकि

विधिरत्र॥ ङि॰ दन्तस्य न क्रमः॥ त्र्याणाम्॥ त्रिषु॥ परत्र्याणाम्॥ कति
शब्दो नित्यं बहुवचनान्तः॥ ङुतेः॥ उत्यन्त संख्यायाः परयो जश्शसो
र्लुक्॥ प्रत्ययलोपे प्रत्ययलक्षणम्॥ लुकि न तन्निमित्तम्॥ कति २
॥ कतिभिः॥ कतिभ्यः॥ २॥ कतीनाम्॥ कतिषु॥ औडुलोमिः औडु
लोमी॥ उडुलोमाः॥ लोम्नोऽपत्येषु बहुष्वकारः॥ औडुलोमिम्॥ औ
डुलोमी॥ उडुलोमान्॥ औडुलोमिना॥ वातप्रमीः॥ वातप्रम्यौ॥
वातप्रम्यः॥ वातप्रमीम्॥ वातप्रम्यौ॥ वातप्रमीन्॥ वातप्रम्या॥ वा

सि.च.ना. २२ हूर्ण्दपि॥ लूनमिच्छति लूनीः॥ लूनुः स्त्याम प्रस्तीममेवेच्छति॥ द्वा
मीः॥ स्त्याम्युः॥ प्रस्तीमीः॥ प्रस्तीम्यौ॥ प्रस्तीम्यौ॥ प्रस्तीम्युः शुष्कीः॥
कृतपादेशत्वाभावान्नोत्वम्॥ शुष्किपः॥ पक्विपः॥ हूहूः॥ हूहौ॥
हूह्वः॥ हे हूहूः॥ हूहूम्॥ हूहून्॥ शेषं वातप्रमीवत्॥ एवं हूहूः॥ अ
तिचमूः॥ बहुश्रेयसीवत्॥ खलपूः॥ खलप्वौ॥ खलप्वः॥ ए
वमुन्नसुल्वादयः॥ स्वयम्भूः॥ स्वयंभुवौ॥ स्वयंभुवः॥ एवं लूख
भूकवभूदृम्भूकारान्नपरमन्वादयः॥ वर्षाभूः॥ वर्षाभ्वौ॥ वर्षा

भ्वः॥ वर्षाभ्वम्॥ एवं करभूपुनर्भूदृन्भूशब्दाः। सेरा। अकारान्ता
ऋ१२ न्तस्य सेरा न भवति सवर्डित। पिता॥ पञ्चसु। अकारस्यार भवति प
ञ्चसु। पितरौ। पितरः॥ धेरर। अकारान्तस्य धेरन भवति सवर्डि
त। हे पितः। पितनम्। पितनम्। पितनौ। पितॄन्॥ अतोङसुङः॥ पि
तुः। ङौ। अकारस्यार भवति ङौ॥ पितरि। एवं जामातृभ्रात्रादयः॥
नुर्वा। नामि दीर्घः। नृणाम्। नृणाम्। शेषं पितृवत्। स्तुनाप्। सकार
त्वष्टृप्तृसपसंबंधिन अकारस्यार भवति पञ्चसु। कर्ता। कर्तारौ। क

सि.च.नाः
२४

र्तारः॥हेकर्त्तः॥कर्त्तारम्।कर्त्तारौ।कर्त्तॄन्।उद्गातृनप्तृनेष्टृक्षत्तृहो
तृपोतृप्रशास्तॄणांच॥उद्गाता॥नप्ता॥क्रोष्टुशब्दस्यपुंसियच्चस्व
धिषुस्त्रियांचतृवद्रूपम्।क्रोष्टा।क्रोष्टारौ।क्रोष्टारः॥हेक्रोष्टो।क्रो
ष्टारम्।क्रोष्टारौ।क्रोष्टून्।टादौस्वरेक्रोष्टुशब्दस्यतृवद्वा।क्रोष्ट्रा
।क्रोष्टुना।क्रोष्ट्रे।क्रोष्टवे।क्रोष्टुः।क्रोष्टोः।क्रोष्ट्रोः।क्रोष्ट्वोः॥कृताकृत
प्रसंगीयोविधिःसनित्यः॥नित्यानित्ययोर्नित्यविधिर्बलवान्क्रो
ष्टूनाम्॥क्रोष्टरि।क्रोष्टौ।क्रोष्ट्रोः॥इनाकामेनसहवर्त्ततेसिः॥स

म्॥परमनियौ॥शुद्धधियौ॥अनेकस्वरस्यकिम्॥नियौ॥ङौ॥नियाम्
॥कुमारीमिच्छन्कुमारीवाचन्कुमारीना॥हसेयइतिसिलोपः॥प्र
मिश्रास्ति॥कुमार्यम्॥कुमार्यौकुमार्यः॥शेषंबहुश्रेयसीवत्॥सखा
यमिच्छतिसखीयति॥एकदेशविकृतस्यानन्यत्वात्॥ङेत्वे॥सखा
॥सखायौ॥सखायः॥हेसखीः॥सख्युः॥सख्या॥सहखेनवर्त्तते
सखस्तमिच्छतिसखीः॥सख्यौ॥सुतमिच्छतिसुतीः॥सुत्यौ॥खी
तीत्योःकृतयादेशात्योङ्स्ङ॥सख्युः॥सुत्युः॥तकारस्यानजा

सि.ब.ना. पुल्लिङ्गाः॥ आपः। आदंतादावन्तात्परस्य सेर्लोपः। गंगा। औ। आ
२५ दन्तात्परस्यौरीर्भवति। गंगे। गंगाः। धिरौ॥ आदन्तादावन्तात्परे धि
रीर्भवति। हे गंगे। हे गंगे। हे गंगाः। हे गंगाम्। गंगे। गंगाः। टौसोरेआ
दंतस्यावन्तस्य टौसोः परयोरेत्वम्। गंगया॥ ङितां यट्। आदन्ता
दावन्तात्परेषां ङे ङसि ङस् ङीनां यडागमः। गंगायै। गंगायाः। आम्
ङेः॥ आदन्तादावन्तात्परस्य ङेः आमादेशः॥ गंगायाम्। गंगयोः॥
गंगासु॥ एवं श्रद्धामेधादुर्गादयः। पूर्वाणां द्विस्वराणां धौ ह्र

स्वः॥ हे अम्ब। हे अक्क। हे अल्ल॥ शेषं गङ्गावत्। पटो वा सर्वादेः प
रस्य पटः सुडागमो भवति पूर्वस्य चापोकारः। सर्वस्यै। सर्वस्याः। सर्वस्याम्
। एवं विश्वादयश्चावन्ताः। जरा। जरसौ। जरे। जरसः। जराः। दिक्समासे बहु
व्रीहौ सर्ववद्वा सर्वकार्यम्। दक्षिणपूर्वस्यै। दक्षिणपूर्वायै। उत्तापूर्वस्याः
उत्तरपूर्वायाः॥ अन्तरस्यै शालायै वा ह्यायै इत्यर्थः। अपुरीत्युक्तेनेह।
अन्तरायै नगर्यै॥ द्वितीयस्यै। द्वितीयै॥ तृतीयस्याः॥ तृतीयायाः। तृती
याभ्याम्। तृतीयाभ्यः। तृतीयस्याः॥ तृतीयासु॥ नासिकायानस्। न

सः। नासिकाः। नसा। नासिकया॥ नोभ्याम्। नासिकाभ्याम्। पक्षेपञ्च
सुवर्गेवत्। पृतनायाः पृतः। पृतनाः। पृता। पृतनया पृद्भ्याम्। पृद्भिः
।निशायाः॥ निश्। निशः निशाः छशषराजादेः षः। छकारान्तस्यशका
रांतस्यषकारांतस्यचराजयजसृजमृजभ्रस्जभ्रश्चव्रश्चांजादेश्चषका
रोभवतिधातोर्न्क्सेनाम्नश्चरसेयदान्ते च। नोट्ः। निड्भ्याम्। निं
ड्भिः निट्सु। निड्त्सु निशासु। केचित्तुधातो [illegible] नेवषत्वमा
हुः। तन्मते न्क्वेजवाइतिजकाः। निज्भ्याम्। निज्भिः। श्चुत्वम्। निच

यौ। सयः। सयम्। सयौ। सयः। सया। सेभ्याम्। सेषु। स्मृता ई लक्ष्मी।
र्यैनसः। स्मृतेः। स्मृतयो। स्मृतयः। नैस्मि नैशब्दस्याकारो भवतिस
कारनकारादौ विभक्तौ। सुराः। सुरायौ। सुरायः। सुराभ्याम्। सुरा
सु। औरौ। ओकारस्यौकारो भवतिपञ्चसु। गौः। गावौ। गावः। हेगौः।
हेगावौ। हेगावः। आम्शसि। ओकारस्यात्वं भवति अमिशसि च
परे। गाम्। गावौ। गाः। गवा। गोभ्याम्। गोभिः। ङस्य। गोः एवं सुद्योः।
स्मृतङः शंतुर्येनसस्संनौः। ग्लौः॥ ग्लावौ। ग्लावः। इतिस्वरान्ताः

सि॰चा॰ना॰ कारवत्॥ ततो ऽरानुकारा न भवन्ति। सेरा धेरस्तु भवति॥ ति
२१ स्रः॥ तिसृभिः। तिसृभ्यः। न तिसृचतस्रोर्नामि दीर्घः। तिसृणा
म्। स्त्रियामिति त्रिचतुरोर्विशेषणान्नेह। प्रियास्त्रयः। प्रिया
णि त्रीणि वा यस्याः सा प्रियत्रिः। बुद्धिवत्। आमि प्रियत्रयाणा
म्॥ पादा स्त्रियां मुख्यो लिंगान्तरे गौरागौ तदन्तौ स्तः। प्रियाति
स्रो पस्य सः प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। हे प्रियतिसः। ना
म शासोरन्लोपः। प्रियतिसृम्। प्रियतिस्रौ। प्रियतिसृः। प्रिया

तिस्रो पस्य तत्कुलं प्रियत्रि॥ नुकि नत्रिन्निमित्तमित्यस्यानित्यत्वा
त्सक्षे। प्रियतिसृः। प्रियतिसृणी। प्रियतिसृणि। टादौ स्वरे टादावि
ति पुंवत्वा। प्रियतिसृणा प्रियतिस्रा। द्वेरत्वे सत्याप्॥ द्वे। द्वाभ्याम्
। द्वयोः। द्वसेपस्सेर्लोपः। नदी। नद्यौ। नद्यः। हे नदि। नदीम्। नद्यौ
॥ नदीः। ङितामट्। नद्यै। नद्याः। नदीनाम्। नद्याम्। एवं ब्राह्मी
सखीकुमारीगौर्यादयः। लक्ष्मीः। अनीवन्तत्वान्न सिलोपः। धो
ह्रस्वः। स्त्रियां धोर्म्मरेह्रस्वो न भवति। हे लक्ष्मि। शेषं नदीवत्। एवम

बीतन्त्रीतरीप्रभृतयः॥ ईबन्तत्वात्सिलोपः॥ स्त्रीस्त्रीभुवोः॥ स्त्री
शब्दस्य न्त्रशब्दस्य चेयुवौ भवतः स्यादौ स्वरे परे॥ स्त्रियौ॥ स्त्रियः
॥ हे स्त्रि॥ वाम्शसि॥ अमिशसि च परे स्त्रीशब्दस्य वा इयन् भवति॥ स्त्रि
यम्॥ स्त्रीम्॥ स्त्रियः॥ स्त्रीः॥ स्त्रिया॥ स्त्रीणाम्॥ स्त्रीमति क्रांतोऽतिस्त्रिः॥
अतिस्त्रियौ॥ अतिस्त्रियः॥ एत्वनानावौत्वनुड्भिः सवर्णस्यैः पुंसि बाध्य
ते॥ क्लीबे नुमा च स्त्रीशब्दस्यइयपि स्यव धार्यताम्॥ १॥ हे अतिस्त्रे॥ अ
तिस्त्रियम्॥ अतिस्त्रिम्॥ अतिस्त्रियः॥ अतिस्त्रीन्॥ अतिस्त्रि

शुः॥ निस्त्रुः॥ गोपाः सोमपावत्॥ बुद्धिः॥ बुद्धी॥ बुद्धयः॥ बुद्धिम्॥ बु
द्धी॥ बुद्धीः॥ ङदुत्स्त्र्याम्॥ स्त्रियां वर्त्तमानाभ्यामिकारोकाराभ्यांपरे
षांङितां वचनानां वा डागमो भवति॥ बुद्ध्यै॥ बुद्धये॥ बुद्ध्याः॥ बुद्धेः॥ स्त्रि
यांयोः॥ बुद्ध्याम्॥ डागमाभावे आमोऽप्यभावः॥ बुद्धौ॥ हे बुद्धे॥
एवं मतिभक्तिधृतितुष्ट्यादयः॥ धेनुतनुरज्जुहनुचंचुवादयः॥ त्रिचतु
रोः स्त्रियां तिसृ चतसृ वत्॥ स्त्रियां वर्त्तमानयोस्त्रि चतुर शब्द
योस्तिसृ चतसृ इत्येतावादेशौ भवतो विभक्तौ ऋकारस्य च

अतिस्त्रियाः। अतिस्त्रेः। अतिस्त्रियोः। अतिस्त्रीणाम्। अतिस्त्रि
याम्। अतिस्त्रौ। श्रीः। य्वोर्धातोरियुवौ स्वरे। श्रियौ। श्रियः। हे
श्रीः। वेयुवः। इयुवन्तात् ङितामङ्वा स्त्रीं विना। श्रियै। श्रिये।
श्रियाः। श्रियः। इयुवंतादामो नुड्वा स्त्रियास्तु नित्यम्। श्रीणा
म्। श्रियाम्। श्रियि। श्रियाम्। एवं ह्रीधीप्रभृतयः। एवं भ्रूप्रभृ
तयः। प्रधीशब्दस्य लक्ष्मीवत्। केषांचिन्मते तु युवत्। प्रकृ
ष्टा धीरिति विग्रहे तु लक्ष्मीवत्। अमि शसच। प्रध्यम्। प्रध्यो।

प्रध्यः। सुष्ठु धीर्यस्याः॥ सुष्ठु ध्यायतीति वेति विग्रहे। सुधीः श्रीवत्।
केषांचिन्मते युवत्। सुष्ठु धीरिति विग्रहे श्रीवदेव। ग्रामणीयु
वत्। एवं खलप्वादयः। न्नणईप्। नकारान्तादृकारांताद्
णान्ताच्च स्त्रियामीप्प्रत्ययो भवति। क्रोष्ट्री। क्रोष्ट्र्यः। वध्वा
दयो नदीवत्। पुनर्भूः। य्वोर्वा। पुनर्भ्वौ। पुनर्भ्वः। हे पुनर्भु। पु
नर्भ्वा। पुनर्भूणाम्। पुनर्भ्वाम्। नैकाचां पुनर्न वामोरुस्त्रीवर्षा
भूर्ईईनेसमान्। हे वर्षाभु। वर्षाभ्वः। स्वयंभूः पुंवत्। नका

सि॰ व॰ ना॰ ३० रांतसंख्यायाः स्वसृतिसृचतसृननाहृदुहितृमातृमातृ
भ्यश्च नेषायौ। माता पितृवत्। स्वसा कर्तृवत्। शसि मातॄः
स्वसॄः। राः पुंवत्। गौः पुंवत्। नौः ग्लौवत्। इति स्वरान्ताः स्त्री
लिंगाः ॰ अतोऽम्। अकारान्तान्नपुंसकलिंलिङ्गात्परयोः
स्यमोरम् भवति। कुलम्। ईमौ। नपुंसकलिंगात्परस्यौरीका
रमापद्यते। कुले। जश्शसोः शिः। नपुंसलिंगात्परयोर्ज
स्शसोः शिर्भवति। नुमयमः। नपुंसकस्य नुमागमो न

णा। प्रतिस्त्रियै। प्रतिस्त्रेः प्रतिस्त्रियोः। प्रतिस्त्रीणाम्। प्रतिस्त्रौ
प्रतिस्त्रिषु। अमौ सौ कारे च नित्यं स्यादम्शसोस्तु विभाषया। इया
देशस्तु नान्यत्र स्त्रियाः पुंस्युपसर्जने॥ क्लीबे तु नुम्। प्रतिस्त्रि
। प्रतिस्त्रिणी। प्रतिस्त्रीणि। प्रतिस्त्रिणा। प्रतिस्त्रये। प्रतिस्त्रि
णे। प्रतिस्त्रेः। प्रतिस्त्रिणः। प्रतिस्त्रियोः॥ प्रतिस्त्रीणोः। प्रति
स्त्रीणाम्। प्रतिस्त्रौ। प्रतिस्त्रिणि। स्त्रियान्तु प्रायेण पुंवत्। शर
सि। प्रतिस्त्रीः प्रतिस्त्रिया। इड्भ्याम्। प्रतिस्त्रियै। प्रतिस्त्रये।

सि॰च॰ना
३१

ऽजरसी। ऽजरे। ऽजराणि। ऽसम्महतो धो दीर्घः शौच॥ ऽसंतस्याप्
शब्दस्य महच्छब्दस्य च दीर्घो भवति पञ्चस्वधिषु शौ च। ऽजरां
सि। ऽमिनुकोपवादमभ्भावेवाधित्वाजरस्। ततः सन्निपा
तपरिभाषयाननुक्। ऽजरसम्। ऽजरसा। ऽजरसी। ऽजरे
॥ ऽजरांसि। ऽजराणि। शेषं निर्जरवत्। हृदयोदकास्यमां
सानां हृद उदन् आसन् मांस्। हृदि। हृदा। हृद्भ्याम्। उदा
नि। उद्ना। उदभ्याम्। आसानि। आस्ना। आसभ्याम्। मांसि

मांसा। मान्भ्याम्। नपुंसकस्य। ह्रस्वो भवति। श्रीयं कुलवत्। न
पुंसकात्स्यमोर्लुक्। ऽस्थि। घ्रवर्णां नपुंसके धो गुणो वा। हे ऽस्थे
। हे ऽस्थि। नामिनः स्वरे। नाम्यन्तस्य नपुंसकस्य नुमागमो भ
वति इकारस्य चाकारः ऽल्लोपः स्वरे ऽम्वयुक्तात्सादौ। ऽ
स्थ्ना। ऽस्थ्ने। ऽस्थ्नः। ऽस्थ्नोः। ऽस्थ्नाम्। वेड्योः। ऽस्थ्नि। ऽस्थ
नि। एवं दधिसक्थ्यक्षिशब्दाः तदंतस्यापीष्टः प्रियास्था। ऽप
तिदध्ना। वारि। वारिणी। वारीणि। ऽमिनुट्। वारीणाम्। नपुंस

